1134

M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 901

Title: Diksha Nirnaya

901

901

Z

		Dikshanirnaya.	Title.
			Author.
			Editor.
			Year, Vols.
Sk			Publisher.
901		Pauranic.	Remark.

॥श्रीगणेशायनमः ॥ ॥अथ दीक्षायां मासादिविचारः ॥ ॥चैत्रे बहुविधं दुःखं वैशाखे रत्नसंचयः ॥ ज्येष्ठे तु मरणं ज्ञे-
यमाषाढे गोत्रनाशकः ॥ श्रावणे सर्वसंपत्तिः नभस्ये भाद्रपदे क्षयः ॥ यतीनां चाश्विने मासि सर्वत्र शुभमेव हि ॥ ज्ञानं का-
र्त्तिकमासे स्यान्मार्गशीर्षे सुखप्रदः ॥ ज्ञाननाशः पौषमासे माघे मेधाविवर्द्धनं ॥ सर्वसिद्धिः फाल्गुने मासि मलमासं वि-
वर्जयेत् ॥ रामार्चनचंद्रिकायां ॥ रवौ गुरौ तथा सोमे कर्त्तव्यं बुधशुक्रयोः ॥ अश्विनी रोहिणी स्वाति विशाखा ह-
स्तमेव च ॥ ज्येष्ठोत्तरात्रयेप्येवं कर्यन्मित्रमभिषेचनं ॥ नारदतंत्रे ॥ ॥ रोहिणी श्रवणार्द्रा च धनिष्ठा चोत्तरात्रयं ॥ पुष्यं श-
तभिषक्चैव दीक्षानक्षत्रमुच्यते ॥ पूर्णिमा पंचमी चैव द्वितीया सप्तमी तथा ॥ त्रयोदशी च नवमी प्रशस्ता सर्वका-
मदा ॥ मंत्रसारसंग्रहे ॥ द्वितीया पंचमी वापि षष्ठी वापि विशेषतः ॥ द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा ॥
॥ ता कालिकं मुख्यं च शुभं ग्रहे ग्रहणे सुनार्थिना पक्षोपि मुक्त एवस्मात्कालेपि दिनपंचकं ॥ शारदार्चनचंद्रिकायां ॥
॥ ॥ सुतीर्थे किं विधुग्रासे तत्र दामनपर्वणि मंत्रदीक्षां प्रकुर्वाणो मासर्क्षदिनशोधयेत् ॥ सूर्यचंद्रग्रहे तीर्थे सि-
द्धक्षेत्रे शिवालये ॥ मंत्रमात्रप्रकथनमुपदेशः स उच्यते ॥ तत्त्वसारे ॥ ॥ दुर्लभे सद्गुरूणां तु सकृत्संग उपस्थिते ॥ त- २
दनुज्ञा यदा लब्धा सदीक्षावसरो महान् ॥ ग्रामे वा यदि वारण्ये क्षेत्रे वा दिवसे निशि ॥ आगच्छति गुरुर्दैवात्तदा दीक्षा
तदाज्ञया ॥ यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः ॥ विष्णुयामले ॥ ॥ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रान्सद्भि-

योपि वा ॥ अविष्णुनकिरतान् स्त्रीशूद्रादीन् ह्यपि विधिना गुरुः ॥ गुरुः परीक्ष्य यच्छिष्यं संवत्सरमतंद्रितः ॥ नियमान्वि-
हितान्वत्सरे शिष्यं वयेद्वत्सरं शतं ॥ शंखचक्रादिमुद्रिमा ॥ ॥स्कंदपुराणे ॥ ॥नारायणायुधैर्नित्यं चिह्नितो यस्य विग्रहः ॥
॥ पापकोटियुक्तस्यापि तस्य किं कुरुते यमः ॥ अंकितः शंखचक्राभ्यामुभयोर्बाहुमूलयोः ॥ समर्चयेद्धरिं नित्यं नान्यथा
पूजनं न चेत् ॥ सनत्कुमारसंहितायां ॥ ॥ न वर्त्तते यस्य देहे ह्युभौ शंखचक्रे दिने दिने ॥ शंखचक्रगदापद्मं लिखितं सोच्यतेऽच्युतं ॥
॥ पद्मपुराणे ॥ ॥ उपवीतादिवद्धार्यः शंखचक्रादिकस्तथा ॥ ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥ आदित्यपु-
राणे ॥ ॥ शंखचक्रोर्द्ध्वपुंड्रादिरहितं ब्राह्मणाधमं ॥ गर्दभं तु समारोप्य राजा राष्ट्रात्प्रवासयेत् ॥ पद्मपुराणे ॥ ॥ शंखचक्रा-
दिचिह्नैश्च विप्रैः प्रियतमैर्हरेः ॥ रहितः सर्वधर्मेभ्यः प्रच्युतो नरकं व्रजेत् ॥ ब्रह्मांडपुराणे ॥ ॥ तप्तायुधांकितं दृष्ट्वा सम्मा-
नं न करोति यः ॥ द्वादशाब्दार्जितं पुण्यं ब्राह्मणो यो पगच्छति ॥ नारदीये ॥ ॥ श्रीशंखचक्रांकितहीनगात्रः श्मशानतुल्यः ह-
रूपोप्यनरः ॥ स्पृष्ट्वा नरं तत्पतितं सवासाः ॥ आचम्य सम्यक् हरिमंगमस्तु ॥ धृतशंखचक्रपीयूषं यथा न स्पृशंति तत्पूर्णात्रा च-
क्राकार इति श्रुतेः तथा शातातपोब्रवीत् ॥ भगवद्वाक्यं ॥ ॥ मम चावतारचिह्नानि दृश्यंते यस्य विग्रहे ॥ मर्त्योऽमर्त्यो
न विज्ञेयः ॥ स्मरन्नाम कीर्तनं यावच्छंखपद्मं चक्रगदा च कं तिष्ठति ॥ देहे तावत्कुलानि निफलं गोकोटिदानजं ॥ वा-
राहपुराणे ॥ ॥ तप्तायुधं किं च विचिह्नितोपि चंदनमुद्रया ॥ प्रयागादिषु तीर्थेषु स्नानवान्किं करिष्यति ॥ यथाग्निर्दहते
काष्ठं वायुना प्रेरितोऽक्षं ॥ तथा दहति पापानि दृष्ट्वा तप्तायुधं निवै ॥ ब्रह्मब्रह्माणवाक्यं ॥ ॥ शंखांकिततनुर्विप्रो भुंक्ते

विप्रस्य वेश्मनि ॥ तदन्नं स्वयमश्नाति पितृभिः सह नारद ॥ यः करोति हरेः पूजां कृष्णशंखांकितो नरः ॥ अपराधसह
स्राणि नित्यं हरति केशवः ॥ ब्रह्मवैवर्ते सनत्कुमारवचनं ॥ ॥ यस्य नारायणी मुद्रा दाहशंखादिचिह्नितं । सर्वांगं चिह्नि
तं यस्य शत्रुं नारायणो जयेत् ॥ प्रवेशो नास्ति पापस्य कवचेनैव चैव वं ॥ चक्रं च दक्षिणे बाहौ शंखं च वामे पि दक्षिणे
गदां वामे गदाधरस्य तु पुनः चक्रं च धारयेत् ॥ शंखोपरि तथा पद्मं पुनः पद्मं च दक्षिणे ॥ उभयोर्नाममुद्रां तु संग्रह
यात्तु सार... वैष्णव कवचाख्यायां ॥ ॥ धृतोर्ध्वपुंड्रं तत चक्रधरः विष्णुपरं पश्यति यो महात्मा ॥ स्वरेणमंत्र
ेण सहा हृदि स्थं परात्परं यन्महतां महांतं ॥ अथर्ववेदे ॥ एभिर्वयमुरुक्रमस्य चिह्नैरंकिता लोके सुभगा भवे
म ॥ तद्विष्णोः परमं पदं ये गच्छन्ति लांछिताः ॥ स्कंदपुराणे ॥ ॥ हरिनामाक्षरयुतं ये निगच्छन्ति लांछिताः ॥ नालेगो
पामृतं किंतु ॥ तुलसीमालिकोरस्कं नमस्तं शांतं नाकायमः ॥ पद्मपुराणे ॥ ॥ तप्तनामा हरेर्गात्रे ... कयेद्द्वस्ता हि
ना ॥ स लोकपावनो भूत्वा विष्णुलोकमवाप्नुयात् ॥ शंखचक्रांकितः कार्यो ब्राह्मणो बाहुमूलयोः ॥ उताग्निनैव
तस्य सर्वपापापनुत्तये ॥ अन्यैर्न दाहयेज्जातु ब्राह्मणो हरिलांछनात् ॥ शंखचक्रगदापद्मराजुदिन्योईरर पि
न जल्हणोर्द्र ... इति क्रियां ॥ विष्णुचक्रविहीनास्तु ब्राह्मणाः श्वानता स्मृताः ॥ ब्रह्मांडसंहितायां ॥ २
निवेद्य केशवे मालां तुलसीकाष्ठसंभवां ॥ वहते यो नरो भक्त्या तस्य नैवास्ति पातकं ॥ सदा प्रीतमनास्तस्य
कृष्णो देवकीनंदनः ॥ तुलसीकाष्ठसंभूतां यो मालां वहते नरः ॥ प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे ॥ तुल

सीकाष्ठसंभूतां प्रेतराजस्य दूतकाः ॥ दृष्ट्वा नश्यंति दूरेण वातोद्धूतं यथा दलं ॥ पद्मपुराणे ॥ ॥ ये कंठलग्नतुलसी
नलिनाक्षमाला ये बाहुमूलपरिचिह्नितशंखचक्राः ॥ ये वा ललाटफलके लसदूर्ध्वपुंड्रास्ते वैष्णवा भुवनमाशु
पवित्रयंति ॥ न जह्यात् तुलसीमालां धात्रीमालां विशेषतः ॥ महापातकसंहर्त्री धर्मकामार्थदायिनी ॥ पद्मपुरा
णे ॥ ॥ त्रयो देवा ब्रह्माद्या देहे स्थिताः संध्यासु ये यो ग्रयः ॥ तुलसीकाष्ठकं विप्रेन्द्र दा कंठे निमग्ना ॥ स्कंदपुराणे
॥ ॥ धात्रीफलकृतां मालां कंठस्थां यो वहेत् कलौ ॥ वैष्णवो न स विज्ञेयो विष्णुपूजारतो यदि ॥ गारुडपुराणे ॥ ॥ क्षर
यंति न ये मालां हैतुकाः पापबुद्धयः ॥ नरकान्न निवर्तंते दग्धाः कोपाग्निना हरेः ॥ तस्माद्धार्यं किं तु विप्र तुलसीका
ष्ठभूषितं ॥ ... निंदापरो यस्तु स बौद्धेनत्रु विप्लवः ॥ गुरुर्यस्य नवेत् तुष्टः स्वास्मे तुष्टो हरिः स्वयं ॥ विष्णुरहस्ये ॥ ॥ तस्मा
त्सर्वप्रयत्नेन यथा विष्णुस्तथा गुरुः ॥ अन्ये हि नर्वापद्य ... न किंचिन्मामृष्यात् ॥ श्रीभागवते ॥ ॥ आचार्यं मां
विजानीयान्नावमन्येत कर्हिचित् ॥ न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः ॥ आदित्यपुराणे ॥ ॥ अविद्यो वा सविद्यो
वा गुरुरेव जनार्दनः ॥ हीरो लष्ट गुरु ... कष्टेन कथं न ॥ तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेत् ॥ स्कंदमनके
धौ ॥ ॥ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ॥ ... मन्येत कुंजरशौचवत् ॥ नारदीये ॥ ॥ गुरौ
न्निहिते यस्तु यजेद्देवं ... ॥ स दुर्गतिमवाप्नोति पूजनं तस्य निःफलं तथे ॥ ॥ होमः ... नाद्दा
त्स्य प्रकर्षि ... परित्यक्तो नस्य ... हरिः ॥ हरिवंशे ॥ ॥ मातरं पितरं ...

शुं ग्रहं विप्रं त्वप्रफलं च कल्पो बितृतत्त्व यत्नमृतं ॥ प्रति पद्य गुरुं यस्तु मोदाद्वि प्रतिपद्यते ॥ स कल्पकोटिनरके
पच्यते पुरुषाधमः ॥ अगस्त्यसंहितायां ॥ ॥ ये त्रिसंध्यं मुखद्वारा ध्मातु रवेद्धेवमानिताः ॥ पुत्रमित्रकलत्राद्यैः
पच्यन्ते कृतांडिताः ॥ ये सुवर्णं न कुर्वंति पापिष्ठाः पुरुषाधमाः ॥ न तेषां नरकक्लेशान्निस्तारो मुनिसत्तम ॥ पं
चरात्रे ॥ ॥ अवैष्णवेन दृष्टेन मंत्रेण न परा गतिः ॥ पुनश्च विधिना सम्यग्वैष्णवाद्ग्राह्येन्मनुं ॥ नारद पंचरा
त्रे ॥ ॥ मद्भक्तस्य [illegible] ॥ पि सर्वयत्नेषु दीक्षितः ॥ सद्गुरुआत्माधमया [illegible] नुपुरुषस्यादा [illegible] वः ॥ पंचरात्रे ॥ ॥ अ
रुणोदयवेलायां निमेषं शल्पतां व्रजेत् ॥ त्रायस्तुस्यान्मद्दाग्रल्पघटिकामात्रयोगतः ॥ अतिशल्यं वि
जानीयात्तत्तावज्रप्रहारवत् ॥ अरुणोदयवेलायां शल्यं तत्तु समते हरिः ॥ घटिकायाश्च तिक्रांतो [illegible]
तकमावहेत् ॥ मुहूर्ते तस्मिन्नतिक्रांते [illegible] पातकमुच्यते ॥ अतिपातकमेव स्याद्धरि कालात्वतुष्टयो [illegible]
नमतिक्रांते न प्रायश्चित्तं न विद्यते ॥ रामार्चनचंद्रिकायां ॥ ॥ [illegible] जिनं व्याघ्रचर्म कौशेयं वेत्रनिर्मितं ॥
[illegible] जिनं कंबलं वा कल्पयेदासनं मृदु ॥ वंशास्मदारुधरणीतृणपल्लवनिर्मितं ॥ वर्जयेदासनं धीमान्दा
रिद्र्यव्याधिदुःखदं ॥ शालिग्रामलक्षणं ॥ ॥ स्कंदपुराणे ॥ स्निग्धा [illegible] पांडुरा [illegible] पीता नीला तथैव च ॥ [illegible] ३
[illegible] वक्रा [illegible] लांछिता ॥ कपिला कर्बुरा भग्ना बद्धचक्रैकचक्रिका ॥ बृहन्मुखी बृहच्चक्रा
[illegible] ॥ बद्धचक्राथवा [illegible] चक्रा [illegible] मुखी ॥ स्निग्धा [illegible] मंत्रे [illegible]

[illegible] ॥ पीता पुत्रफलप्रदा ॥ नीला संदिशते लक्ष्मीं रक्ता रोगप्रदायका ॥ [illegible] निर्ध्यं [illegible]
[illegible] ॥ [illegible] निहंति वेदाप्त [illegible] फलातु [illegible] लांछिता ॥ कपिला कर्बुरा भग्ना बद्धचक्रैकचक्रिका ॥ बृहन्मुखी
बृहच्चक्रा [illegible] ॥ बद्धचक्रा [illegible] मुखी ॥ [illegible] प्रमादेन [illegible]
[illegible] ॥ ब्रह्मपुराणे ॥ ॥ तथा [illegible] लमुखी भग्ना विषमा बद्धचक्रिका ॥ विकारा [illegible] नाराविंद्गतथैव च ॥ क
पिला विषमा [illegible] शिला ॥ [illegible] ॥ [illegible] ॥ नि कामेषु
ब्रह्मपुराणे ॥ ॥ खंडितं स्फुटितं [illegible] विनेदितं ॥ शालग्रामशिलाभूतं [illegible] धर्म [illegible] प्रमाण
[illegible] ॥ स्कंदपुराणे ॥ ॥ शालग्रामशिलायां यो [illegible]
[illegible] ॥ सर्वेत्तनरकं यांति यावदाहूत [illegible] ॥ कपिलोनार
[illegible] ॥ पद्मपुराणे ॥ माघमाहात्म्ये ॥ ॥ यदा मनंति
[illegible] शालग्रामशिलार्चनात् ॥ अपि पापसमाचारः कर्मण्यनधिकारि
[illegible] शालग्रामार्चकोविप्रस्यावैव्यांति यमालयं ॥ कामक्रोधप्रलोभेषु व्याप्तो योत्र नराधमः ॥ सोपि याति हरेर्लोकं शाल
ग्रामशिलार्चनात् ॥ यः पूजयति गोविंदं शालग्रामे सदा नरः ॥ आभूतसंप्लवं पावत्तस्मन्प्रच्यवते दिवः ॥ विना तीर्थै
र्विना दानैर्विना यज्ञैर्विना मतिं ॥ मुक्तिं याति नरो वैश्य शालग्रामशिलार्चनात् ॥ नरकं गर्भवासं च तिर्यक्कं क्रमियो

निंतो। मयालिवे शप्यापो पिशालग्रामशिलार्चकः॥ स्कंदपुराणे। कार्त्तिकमाहात्म्ये शिवषण्मुखसंवादे॥ ॥कामात्मेहो
पियो निंद्या तांकीलावविवर्जिताः॥ शालग्रामशिलां तत्र संस्पृश्यैवोक्ततांनवेत्॥ अथ विवर्जिताचारः सत्पशौचविवर्जि
ताः॥ शालग्रामशिलां स्पृष्ट्वा सद्य एव क्षयेन्निवित्॥ स्कंदपुराणे ब्रह्मनारदसंवादे॥ ॥ब्राह्मणक्षत्रियविशांसत्शू
द्राणामथापि वा॥ शालग्रामेऽधिकारोस्ति न वान्येषां कदाचन॥ हेमाद्रिपुराणे॥ ॥ब्राह्मणः क्षत्रियावैश्याः स्त्रिय
शूद्रास्तथा प्यः॥ संस्पृश्य तत्पुरश्रेष्ठ जनत्या॥ सिंद्वषद्वर॥ स्तव्यं ते वा श्रुतेर्थैर्जन्मकोटिसमुद्भवे॥ लिंगपुराणे
॥॥ [illegible] तु जेस्त्रस्मात्रीत्यर्थमिमत्तनक॥ कर्तव्यं सततं वस्त्रं शालग्रामशिलार्चनं॥ ब्राह्मणस्यैव सज्योद्दंश्वेर
वेरपि॥ स्त्रीशूद्रकरसंस्पर्शो वज्रादपि सुदुष्करः॥ एतद्वचनमवेक्ष्य स्वपरं स्तवर्थ्य निषेधविषयकं वचन
विपर्यथ्यपि॥ तत्स्कंदपुराणे॥ ॥अशुचि विवर्जिताचारः सत्पशौचविवर्जितः॥ शालग्रामशिलां स्पृष्ट्वा सद्य एव शु
चिर्भवेत्॥ स्त्रीशूद्रस्पर्श मद्यपपरं॥ स्कंदपुराणे॥ ॥स्त्रियो वाप्यहि वा शूद्रा ब्राह्मणः क्षत्रियापरः॥ पूजयित्वा शि
लाचक्रं लभंते शाश्वतं पदं॥ मद्यप सुरमासा धमम कर्म परायणः॥ तस्य पापं प्रवक्ष्यामि शृणु सुदरितव्रत॥
एकजन्म नवेगृध्रश्चांडालः सप्तजन्मवै॥ श्रीभागवते॥ ॥ सात्विकः कारकोसंगी रागांधो राजसः स्मृतः॥ तामसो स्मृ
तिविभ्रष्टो निर्गुणो मदपाश्रय॥ इत्यादिवचनाद्वैष्णवस्त्री शूद्रयोरपि पूजाधिकारः॥ अन्ये चित्तो शिलाधी
र्गरूड तु नरमति वैष्णवे जातिबुद्धिर्विष्णोर्वा विष्णवानां कलिमलमथने पादतीर्थे बुद्धिः॥ कंसारे नामिमंत्रे ४

उत्पन्नकरपुष्टे शब्द सामान्यबुद्धिर्विष्णौ सर्वेश्वरे शेतदितरसमधीर्यस्य वा नारकी सः॥ नैवेद्यपात्रं स्कंदे॥ ॥हैरण्यं
रजतं ताम्रं कांस्यं मृण्मयमेव च॥ पालाशं पद्मपत्रं वा पात्रं विष्णोरतिप्रियं॥ कौर्मे॥ ॥कृतांकं बालिशाकं वा कौ
सुंभमतकं तथा॥ पलांडुं लशुनं सूकं नियासं चैव वर्जयेत्॥ गृंजनं किंशुकं चैव कलंजं च तथैव च॥ उदुंबर
गन्ना४ मलांबुं चजहृद् प्राप्तपतति वै द्विजः॥ स्कंदे॥ ॥ योन्नहृपतिहृंतांकं तस्य दूरतरो हरिः॥ वार्ताकं बृहतीं चैव दग्धमन्नं म
सूरिकां॥ पम्याद्देषप्रवर्त्तते तत्स्य दूरतरो हरिः॥ आगमे अपराधाः॥ ॥ यानैर्वा पादुकैर्वापि गमनं नग
रौदे॥ देवोत्सवाद्यसेवा च अप्रणाममपद्रग्रेतः॥ उच्छिष्टे वाथ्य वाशौ चेजगवद्वंदनादिकं॥ एकहस्तप्रणामश्च तत
[illegible] प्रदक्षिणं॥ पादप्रसारणं वाग्रे तथा पर्यंकबंधनं॥ शयनं भक्षणं वापि मिथ्याभाषणमेव च॥ उच्चैर्भाषा
मिथो जल्पो रोदनानि च विग्रहः॥ निग्रहानुग्रहौ स्त्रीषु च क्रूरभाषणं॥ कंबलावरणं चैव परनिंदा परस्तुतिः॥
अश्लीलभाषणं चैव अधोवायुविमोक्षणं॥ शक्तौ गौणोपचारश्च अनिवेदितभक्षणं॥ तत्तत्कालोद्भवानां च
फलादीनामनर्पणं॥ विनियुक्तावशिष्टस्य प्रदानं व्यंजनादिकं॥ पृष्ठीकृत्यासनं चैव परेषामपि वादनं॥ गुरौ
मौनं निजस्तोत्रं देवतानिंदनादिकं॥ अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्तिताः॥ स्कंदे॥ ॥ वस्तुर्वा सत्रमी
लित्तु नगस्य च विराच रं क्रांतं नवत्ति विप्राप्य तत्क्षोर्धगमनादिकं॥ विष्णुस्मृतौ॥ ॥एकहस्तप्रणामश्च एकाचे
वप्रदक्षिणा॥ अकाले दर्शनं विष्णोर्हंति पुण्यं पुरा कृतं॥ दोसंपिष्यावजा कुंभ्यां नरमा शिर मा दृशा॥

न नमाव स्वस्ताये तिप्रणामो हंत हरितः॥ वाराहे॥ ॥वस्त्राप्रावृतदेहस्तु यो नरः प्रणमेत मां॥ श्वित्री स जायते मूर्खः सप्त
जन्मनि भामिनि॥ अग्रे दृष्ट्वा मम नागे मम पिंगलें मंदिरे॥ जपहोमनमस्कारान्न कुर्यात्केशवालये॥ स्कांदे तुलस्युपाश्रय
मंत्रः॥ ॥तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये॥ केशवार्थं विचिन्वामि वरदा भव शोभने॥ गारुडे॥ ॥तुलसीं प्राप्य
यो नित्यं न करोति ममार्चनं॥ तस्याहं प्रतिगृह्णामि न पूजां शतवार्षिकीं॥ स्कांदे॥ ॥न विप्रसदृशं पात्रं न दानं न सुर
भीसमं॥ न च गंगासमं तीर्थं न पत्रं तुलसीसमं॥ पाद्मे॥ ॥माणिक्यं च न पुष्पाणि तथा मुक्ताफलानि च॥ तुलसीपत्रद
लस्य कलां नार्हंति षोडशीं॥ विष्णुधर्मोत्तरे॥ ॥न छिंद्यात्तुलसीं विप्रा हरिरूपां विशेषतः॥ पवित्रादेवार्थे कृत्यच्छेदये
न्मार्थे स्ति निष्ठपाप्या॥ छिन्नसेनदृष्येत गवा धेपिच्छ्र एण्ध्यव॥ निषिद्धपुष्पाणि विष्णुरहस्ये॥ ॥न कुर्वीत हरेः पूजयेद्देवं
न पुष्पैः कुंदरणीगतैः॥ न विशीर्णैर्द्विदलैः स्पृष्टैर्नाशुचिना विकाशितैः॥ ह्रीतिगंधीन्युगंधीनि निर्गंधानि वर्जयेत्॥ न पूर्ड
करवीरैस्तु कुसुमैरर्चयेद्धरिं॥ पतंति नरके घोरे क्षणितं ध्यायेदर्चितं तु रुषितः॥ आघ्रातैरंगसंस्पृष्टैर्दूषितैश्चैव नार्च
यते॥ स्कांदे॥ ॥करवीरैर्महादेवि यः पूजयति केशवं॥ दशसौवर्णिकैः पुष्पैर्यत्फलं तदवाप्नुयात्॥ ब्रह्मवाक्यं
नारदं प्रति॥ ॥ये वर्धयंति सुरार्चनकरवीरैः पितामहे॥ चतुर्युगानि विप्रेंद्र प्रीतो भवति केशवः॥ नारदीये॥ ॥वि ५
धागीरतं वृक्षं च नरः संयवि विशेषतः॥ ब्रह्मन्नृब्राह्मणानां कदंबं नित्यमर्चितं॥ स्मृतो॥ ॥ तुलसी तादिकु
वीत क्षिरे वान्नि तुष्टये॥ न जीवनाय कुंजीत विप्रः पापभिया क्वचित्॥ स्कंदपुराणे श्रीभागवतमाहात्म्यं॥ ॥नित्यं भा

गवतं यः पठेत्पुराणं पठते नरः॥ प्रत्यक्षरं लभेत्तस्य कपिलादानजं फलं॥ श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवं॥ पठेच्छृणु
यात्स गोसहस्रफलं लभेत्॥ यः पठेत्प्रयतो नित्यं श्लोकं भागवतं मुने॥ अष्टादशपुराणानां फलं प्राप्नोति मानव
॥ ये र्चयंति गृहे नित्यं शास्त्रं भागवतं कलौ॥ आस्फोटयंति मुदा तेषां प्रीताः पितामहाः॥ ये र्चयंति गृहे शास्त्रं श्रीम
द्भागवतं नराः॥ प्रीणिताः स्तैस्त्रिविबुधा यावदाभूतसंप्लवं॥ श्लोकार्धं श्लोकमेकं वा वरं भागवतं गृहे॥ शतशोथ सह
स्रैश्च किमन्यैः शास्त्रसंग्रहैः॥ स्कंदपुराणे॥ ॥ कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ॥ गृहे न तिष्ठते यस्य स विप्रः श्वपचाद
धिकः॥ यस्य नो तिष्ठते भागवतशास्त्रं गृहे कलौ॥ न तस्य पुनरावृत्तिर्यमपाशात्कथंचन॥ यत्र यत्र भवेद्विप्र
शास्त्रं भागवतं कलौ॥ तत्र तत्र हरिर्याति त्रिदशैः सह नारद॥ तत्र सर्वाणि तीर्थानि नदी नद सरांसि च॥ यज्ञाः स
प्तपुरी नित्यं पुण्याः सर्वे शिलोच्चयाः॥ पद्मपुराणे॥ ॥अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु॥ पठस्व स्वमुखे
नापि यदीच्छसि भवक्षयं॥ स्कंदपुराणे॥ ॥श्लोकं भागवतं वापि श्लोकार्धं पादमेव वा॥ लिखितं तिष्ठते यस्य गृहे
तस्य सदा हरिः॥ अथ प्रसादमहिमा॥ ॥श्रीभागवते॥ ॥त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः॥ उच्छिष्टभोजि
नो दासास्तव मायां जयेम हि॥ स्कंदपुराणे॥ ॥नैवेद्यशेषं तुलसीविमिश्रितं विशेषतः पादजलेन सिक्तं॥ योश्ना
ति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यं॥ पद्मे मासोपवासे यत्फलं परिकीर्तितं॥ विष्णोर्नैवेद्य
सिक्थेन फलं तद्भुंजतां कलौ॥ गारुडपुराणे॥ ॥पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेद्धरेः॥ शेषमाल्यं मस्तकेनयत्

इति वेदानुशासनं। ब्रह्मांडपुराणे॥ मुकुंदाशनशेषं तु यो हि भुंक्ते दिने दिने। सिक्थे सिक्थे न वै तस्य लभेच्चांद्रायणशता
धिकं। पद्मपुराणे॥ ॥अंबरीष नवं वस्त्रं फलमन्नं रसादिकं। कृत्वा कृष्णोपभोग्यं हि सदा सेव्यं हि वैष्णवैः। नवित्र
न्दपुराणे॥ ॥नकृत्वा कृष्णे देवस्मृति संवाप्य वेश्मनि। भुंजीत यश्चान्नपानादिकं नरः। स्मृतिषु॥
एक एव नारायण आसीत् न ब्रह्मा न महेशो न द्यावापृथिव्यौ सर्वे देवाः सर्वे पितरः सर्वे मनुष्याः विष्णुनाशितमश्नं
ति। विष्णुना घ्रातं विष्णुना पीतं पिबंति तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुः अनिवेदितं न कुर्याद् ब्रह्मांड
पुराणे॥ ॥पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधं। अनिवेद्य न भुंजीत यदाहाराय कल्पितं। अनिवेद्य तु भुंक्ते
नः प्रायश्चित्ती भवेन्नरः। तस्मात्सर्वं निवेद्यैव विष्णो र्भुंजीत नान्यथा॥ पद्मपुराणे॥ ॥अवैष्णवानामन्नं च पति
तानां तथैव च। अनर्पितं तथा विष्णोः श्वमांससदृशं भवेत्॥ अंबरीष हृषीकेशपदन्यस्तं समाश्नन्। अनि
वेद्य हरे र्भुंजन् सप्त जन्मानि नारकी॥ कूर्मपुराणे॥ ॥अनर्पयित्वा यो विष्णोर्भुंक्ते सोऽधर्मविर्जितः॥ भुंक्ते विष्ठास
मं वाप्यन्नं नीरं तत्सुरयासमं॥ पद्मपुराणे॥ ॥अनिवेद्य तु यो भुंक्ते हरये परमात्मने। पतंति पितरस्तस्य नरके
शाश्वतीः समाः॥ यद्यदिष्टतमं लोके यच्चाति प्रियमात्मनः। तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते। एवं नृणां ६
क्रियायोगाः सर्वे संस्मृति देव हि। तदेवात्म विनाशाय कल्प्यंते कल्पिताः परे। दारान् पुत्रान् गृहान् सुतान् प्राणान् तु पत्य
स्मै निवेदयेत्॥ ॥उद्दिष्ट तु मनु बद्धो पियोगिनश्च दर्पितं। निजकर्ममलिष्टया। विष्णुध्यनान्नैवेद्यकल्पयोप न

स्याप्य वेदिदं जोऽस्तु ततेग तिं परं। विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं। पितृभ्यश्चापि तद्देयं तदानंत्याय कल्प
ते। स्कंदपुराणे॥ ॥देवान् पितॄन् समुद्दिश्य यद्विष्णोर्विनिवेदितं। तानुद्दिश्य पुनः कृत्वा पितृदानं तथैव हि॥ अयं तिष्ठति
नुलो ये दिव्ये नतु तेन वे। मुकुंदगात्र लग्नेन ब्राह्मणानां विलेपनं॥ संदेतेन तु पिंडानां कर्त्तव्यं पितृकर्मणि। महाभारते॥ ॥
प्राप्तं तद्विधिमाश्रित्य यत्रा कृष्णमुखविनिःसृतं। भजया माधवो विंदत् तत्र वैष्णव पितामहा विष्णुमेहिते॥ ॥नदत्तं नोऽर्प्यं
वयं किं विदनिवेद्याग्रतो कुरिनिदेयं पितृदेवेभ्यः शास्त्रविधीयते न वेदत्। प्रसादो कल्पितो देवैरग्र तु शुनगवान्
हरिः। यस्तन्नागमुनो देवान्पितॄन्नैवकल्पिता॥ तेनानिवेदितं विष्णो नश्यकं तिदिवौकसः॥ व्यतिक्रमनयास्त्वं विष्णो
निलेपनगतीतिवे वद्वादयश्च पितरो नृत्यंति हृष्ट्वा सुराः॥ अतस्तत्कुंकुमशेषं तु हरेर्ब्रह्मादि सुरे॥ नारदीये॥
पितृशेषं तु यो दद्या हरये परमात्मने। रेतोधाः पितरस्तस्य भवंति क्लेशभागिनः॥ नृसिंहपंचरात्रे॥ ॥अना
वच्छातु कर्मणि उक्तं तद्वत् हरिशिव दक्षिणा दक्षिणाः। हरेर्नैवेद्य संभारो वैष्णवाय तु समर्पयेत्। हरेर्निवेदितं किं चिन्न
दद्यात् कोऽपि विष्णुः। अनन्यत्वेस्मात् समलेप्यौ यदु दन्निरयेपते तत्॥ नारदपंचरात्रे॥ ॥यावन्मात्रं यमुद्धृत्य शेषं समस्तु
विनिःक्षिपेत्॥ मार्कंडेये॥ ॥यस्तु विद्या विनिर्मुक्तं भूर्जमध्यावैष्णवं। वेदविद्योत्तरं विप्रस्तथा ब्राह्मणंसंचय
स्य। पुराणांशच्छपी दूषं यथा नरपतिलक्षणात्। वक्तांकरहि तं प्रासंघं तथा शास्त्रात्तपोब्रवीत्॥ पाद्मे॥ ॥चक्रांकि

ततनु विप्रो त्यजते यस्सवैत्सनि। तदन्नं स्वयमश्नाति पितृभिः सह केशव॥ विष्णुरहस्ये॥ ॥निवेदयेन्नरो मोहाद्दन्यपं
क्वोदरे। प्रियं॥ स पतति निरये घोरे पंक्तिभेदी नराधमः॥ ब्रह्माण्डे॥ ॥उत्क्रान्तदेवनैवेद्यं द्विजश्चान्द्रायणं चरेत्॥ उत्क्रा
शवने नैवेद्यं सर्वपापैः प्रमुच्यते॥ वैष्णवपुराणे॥ पाद्मे॥ ॥विविधं वैष्णवं प्रोक्तं बाह्यमाभ्यन्तरं तथा॥ शंखचक्रादि चिह्नं बाह्यमात
रवीतरागता॥ बाह्यान्यन्तरसामर्थ्ययुक्तो वैष्णव मुद्राः॥ भगवद्गीतासु शरणागति॥ ॥मन्मना भव मद्भक्तो मद्याजी मां नमस्कु
रु॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ आज्ञा येयं गुणान्दोषान्मयादिष्टानपि स्वकान्॥ धर्मान्संत्यज्य यः सर्वान्मां
भजेत्स च सत्तमः॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ एकादशे॥ ॥ति
ष्ठेत्कर्तव्ये भद्रो नोदनां त्वनिनोदनो यहविंशिनि शंतं श्रोतव्यं श्रुत मे वच॥ मामेकमेव शरणमात्मानं सर्वदेहिनां॥
वि[illegible]नाहमागात् ते॥ ॥कलौ भागवतं नाम स्य पदं समजायत॥ जननी यत्रिणीतत्र पितृणां तु धुरंधरा॥ नारदीये॥
यस्यो पिमदीपात्व वित्सो मक्तो द्विजाधिकः॥ विष्णुभक्ति विहीनो यो यात्स्वि श्वपचाधिकः॥ स्कांदे॥ ॥सकृत्प्रवृत्तिर्धर्माणां न
कोऽयस्ववाकरात्॥ सकृत्सर्वपापानां योतनकुह्यवाकृत॥ धर्मार्जव त्वधर्मोपि दृत्ततो न केशवाकृत॥ पापं जवत्तिधर्मोपि
तवान्नक्वि हृत्तो हरे॥ त्रि शपथ मर्क त्रवा प्यजको नरके हरे॥ सदा तिष्ठति नरकेषु ब्रह्महा पि विमुच्यते॥ स्कांदे॥ ॥नाव
ह्मं तिसंसारे पितरः पिंडतत्पराः॥ यावत्कुले न कश्चित्तस्तु तानैव प्रजायते काशीखंडे॥ ॥भ्रव चरित्रे॥ ॥ब्राह्मणः क्षत्रि 9
यो वैश्यः शूद्रो वा यदि वेतरः॥ विष्णुभक्ति समायुक्तो ज्ञेयः सर्वोत्तमोत्तमः॥ ब्रह्मवाक्यं॥ ॥भक्त टीका वाविधवा विष्णुन
किं करोति या॥ स पुष्पर तिवात्मानं कुल मेकोत्तरं शताः॥ भगवद्वाक्यं॥ ॥न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः॥ तस्मै

देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहं॥ इतिहाससमुच्चये॥ ॥सर्वस्वान भगवद्भक्तं निषादं श्वपचं तथा॥ वीक्षते जातिसामान्या
स याति नरकं ध्रुवं॥ ये चैव पुरुषात्मान पापाचाररतास्तथा॥ ते पियांति परं धर्मं नारायणपराश्रयाः॥ लिप्यंते न स पापेन
वैष्णवा विष्णुतत्पराः॥ आदित्यपुराणे॥ ॥वैष्णवानां भजनको तत्य मानज दान्ये देवताः॥ पुनंति विष्णवाः सर्वे सर्वद्विजमनेजग
त्॥ बृहन्नारदीये सूतवाक्यं॥ ॥इस्मिन्क्रिरसन्याउ पुद्दिनाप्येन रोत्रमाः॥ दुर्दशा वा सुद्ध भावा तेषां नित्यं नमो नमः॥ घोरे कलि
युगे प्राप्ते सर्वधर्म विवर्जिते॥ वासुदेव परा मर्त्यास्ते कृतार्था न संशयः॥ पाद्मे॥ श्वपाकमिव नेक्षेत लोके विप्रमवैष्णवं॥ वैष्ण
वाववर्णबाह्योपि पुनाति भुवनत्रयं॥ नश्रूद्रा भगवद्भक्ता स्ते हि भागवतामताः॥ सर्ववर्णेषु ते शूद्रा ये न भक्ता जनार्दने॥ न कर्म
[illegible] स्य विश्ववानां च विद्यते विप्रो रत्नवरवं हिमो ह्मभाकुर्मनि बिणः॥ ब्रह्मांडे॥ ॥त्यक्त सर्वकुलाचारो महापातक
वानपि॥ विष्णोर्निकि समाश्रित्य कत्ला नार्ईतियातनां॥ पक्षादवाक्यं॥ ॥बकोजलचरानन्न हत्वा मंडूकादि निवर्जये
त्॥ तथाप्यमः सर्वहृ नावर्जयेन्नरकप्तवका॥ विष्णुपुराणे॥ ॥यम नियम विधूत कल्मषाणामनुदिन मच्युतसक्त
मानसानां॥ अपगत मदमान मत्सराणां व्रज भद्रदूरतरेण मानवानां॥ जन्मतिमिन स्वियस्य सोव्ययात्मा पुरुष वरस्य
मतस्य दृष्टिपातो॥ न वगतिरथवा ममाप्रि चक्रप्रति हतवीर्य बलस्य सोन्य लोकं॥ पाद्मे॥ ॥कतिस्मरशिदितं पद्मसोज्यो
विष्णुपरायणः॥ नाहं तत्स्य प्रभुर्दंड सूर्यं दंड विकीर्षवः॥ स्कांदे काशिकमाहात्म्ये॥ ॥वैवस्वत नयं नाक्षित यामरण जन्म
नाः॥ यः कर्ष्या रूके विप्राप्नोत्य श्रामभिक्षा लाग्रतः॥ नारसिंहे यमवाक्यं॥ ॥अहमम रगणाश्चीतन धत्राय मरति जो क

इत्युदितं निशम्याशु गिरिशो द्विजपुंगवान् प्रशस्तिमिमं हरिवासरपारणं तान्नमस्करोमि॥ न दिने हि कर्तुं च छविः कदाचि
न्निमिरपरास्वताप्युपैति विन्द्रां॥ नगवत्तिव दूरावनन्यचेता नूनां मतिनामपि विराजते मनुष्यः॥ श्रीभागवते॥ ॥ तेमेन दे
रमहंतस्थ य द्याम्नो स्मात्यात क्रंनदृपि हृत्पुफाम्य चाह॥ तेदेवसिद्धपरिशि तपवित्रगाथ्यापेसाध्यवासमस्द्दशो भगव
त्पदश्वा॥ जिकालत [illegible] गवदुण्णनामधेयं स्वेतस्य नस्मरति कव्वरणेरविंदं॥ हत्क्षायानानमतियच्छिरएकदापित्ततानस्य
धूमस्तेतोहतलि [illegible] श्वा॥ यम्भोद्धवकृतविकुंडलसंवादे॥ ॥यमः॥ ॥ द्वारावारिकुत्कलोपिसदापापरते॥ पिबा॥ नवन्द्रिय
दष्टात्वा [illegible] दुर्बेनव्रतेन रः॥ स्कांदे॥ ॥ नब्रह्मानाशिवा मे घ्नानाहं मन्ये दिवौकसः॥ नब्राकाः निग्रहं दक्षं चेति चिन्मवानास्म
हृतमलं॥ देवस्य वा विष्णु वदन्यस्ना मम मान्या विशेषतः॥ येषां रतेपमानेन्तु विनान्तेोऽभ्याय तेऽक्वः॥ ब्रह्मलोके नमेवास्तो
नमेवसोहराल्लयो॥ नालये लोकपालानां वैष्णवानां परातवो॥ नदेवानवगंधर्वनियक्षोरगराक्षसाः॥ त्राणं समर्थास्तिष्ठो
वैष्णवानां परानत्ववि॥ ॥ अथ एकादशी नित्यता॥ नारदीये॥ ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ अन्नमाश्रित्य
तिष्ठंति संप्राप्ते हरिवासरे॥ स्कांदे॥ ॥ मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा॥ एकादश्यां तु यो भुंक्ते विष्णुलोकाच्च्युतो भ
वेत्॥ देवलः॥ ॥ नरवेन न पिवेन्नो यन्न स्वादितकर्मन्दिकरौ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ कूर्मे॥ ॥ एकादश्यां न भुंजी ८
त पक्षयोरुभयोरपि॥ वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृही इति॥ विष्णुधर्मोत्तरे॥ ॥ स पुत्रश्च सभार्यश्च स्वजनैर्भक्ति
संयुतः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपि॥ ब्रह्महत्या सुरापस्य स्तेयगुरुतल्पगः॥ विवेचयति यो मोहादेका

दश्यां सितासिते॥ कालिकापुराणे॥ ॥ सर्वेषामेव पापानामाश्रयं तु कृतं तिथिः॥ विवेचयति यो मोहादेकादश्यां सितासि
ते॥ गारुडे॥ ॥ शुक्लावाथ यदि वा कृष्णा विशेषो नास्ति कश्चन॥ विशेषं कुरुते यस्तु पितृहा स तु कीर्तितः॥ सनत्कुमारे॥ ॥ ए
कादश्योर्द्वयोर्यस्तु विशेषं कुरुते नरः॥ तस्योद्धारं न पश्यामि यावदाहूतसंप्लवं॥ तत्त्वसागरे॥ ॥ यथा शुक्ला तथा कृष्णा
यथा कृष्णा तथेतरा॥ तुल्ये ते मनुते यस्तु पद्दिचैत्र वक्ष्याति संक्रांतौ चम्पकहेतुरविशुक्रदिने तथा॥ एकादश्यां न कुर्वी
त उपवासं न पारणं॥ कात्यायनस्मृतौ॥ ॥ संक्रांतौ रविवारे वा यदा चैकादशी भवेत्॥ उपोष्या सा महापुण्या सर्वपापह
रा तिथिः॥ नारदीये॥ ॥ भानुवारमपोपेता तथा संक्रांतिसंयुता॥ एकादशी तु पोष्या सा पुत्रपौत्रविवर्धिनी॥ विष्णुरहस्ये॥ ॥ प
क्षमाण एतयोः पक्षे द्वे वा अपि उपस्थिते॥ सूतकं मृतकं चैव न त्याज्यं द्वादशीव्रतं॥ एकादश्यां श्राद्धनिर्णयः॥ ॥ ब्रह्मवैवर्ते॥ ॥ ये
कुर्वंति मही [illegible] श्राद्धं चैकादशी दिने॥ त्रयस्ते नरकं यांति दाता भुक्तित रक्षया॥ पाद्मे पुष्करखंडे॥ ॥ एकादश्यां यदा रा
म श्राद्धं तिथि [illegible] वेत्॥ तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्॥ पाद्मे उत्तरखंडे॥ ॥ एकादश्यां तु प्राप्तायां माता
पित्रोर्मृतदिने॥ द्वाद [illegible] न्त्वदातव्यं नापवार्यदीन कश्चित्॥ गर्हितान्नं न चाश्नंति पितरश्च दिवौकसः॥ स्कांदे॥ ॥ एकाद
शीयदा नित्या श्राद्धं नैमित्तिकं भवेत्॥ उपवासं तदा कुर्याद् द्वादश्यां श्राद्धमाचरेत्॥ वाराहे॥ उपवासो यदा नित्यः श्राद्धं नै
मित्तिकं भवेत्॥ उपवासं तदा कुर्यादाघ्राय पितृसेवितं॥ नारदः॥ ॥ अष्टाष्टादशवर्षीको मर्त्यो ह्यप्राप्तशीतिवत्सरः॥ भुंक्ते
यो मानवो मोहादेकादश्यां स पापकृत्॥ महाभारते उद्योगे॥ ॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः॥ हविर्ब्रा

ह्मणा कामाय पुरो वचिनमोचर्यं ॥ नविष्ये ॥ ॥ अरुणोदय काले तु दशमी यदि दृश्यते ॥ सा विद्धैकादशी तत्र पापमूलमुपोष
णं ॥ अरुणोदयवेलायां दशागंधमेन्न वेधाद्दि ॥ दुष्टं तत्र प्रयत्नेन वर्जनीयं नराधिप ॥ गरुडपुराणे ॥ ॥ दशमी वेधसंयुक्ता यदि स्या
दरुणोदये ॥ नैवोपोष्यं वैष्णवेन तद्दिने कादशी व्रतं ॥ उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदयः ॥ नारदीये ॥ ॥ नवमी वेधवि
वर्जितः दशम्येकादशी त्यजेत् ॥ सुरया बिंदुसंस्पृष्टं गंगांभ इव निर्मलं ॥ मार्कंडे ॥ ॥ दशम्या शेषसंयुक्ता यदि स्यादरुणोदये ॥ नै
वोपोष्यं वैष्णवेन तद्दिने कादशी व्रतं ॥ वैष्णव लक्षणानि ॥ ॥ वैष्णवेनमता द्यागमोक्त दीक्षां प्राप्तो हि वैष्णवः ॥ स्कांदे ॥ ॥ परमा
पदमापन्नो हर्षे वा समुपस्थिते ॥ नैकादशी त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी ॥ पाद्मे ॥ ॥ सदीक्षा विधिसंपन्नं समंत्रं द्वादशा
क्षरं ॥ अष्टाक्षरमथान्यं वा ये मंत्रं समुपासते ॥ ज्ञेयास्ते वैष्णवा लोके सर्व विघ्न विवर्जिताः ॥ नारदः ॥ ॥ संपूर्णैकादशी यत्र द्वा
दशी पादाद्धिगामिनी ॥ द्वादश्यां च कृतं कार्यं त्रयोदश्यां तु पारणं ॥ एकादशी यदा सम्पूर्णा परतः पुनरेव सा ॥ पुण्यं क्रतुशतस्यो
क्तं त्रयोदश्यां तु पारणे ॥ वीरदश्या ॥ विके व्यासः ॥ ॥ एकादशी यदा तु स्यात् परतो द्वादशी न वेत् ॥ उपोष्या द्वादशी तत्र यदी
च्छेत् परमां गतिं ॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ सैवोपोष्या परा कार्या परतो द्वादशी यदि ॥ ब्रह्मवैवर्ते ॥ ॥ अर्धरात्रे तु के
षांचिद्दशम्या वेध इष्यते ॥ अरुणोदयवेलायां नावकाशो विचारणे ॥ कपाल वेध इत्याहुराचार्या ये हरिप्रियाः ॥ न तन्म
म मतं यस्मात् त्रियामा रात्रिरिष्यते ॥ नारदीये ॥ ॥ बहुवाक्यविरोधेन संदेहो जायते यदि ॥ उपोष्या द्वादशी तत्र त्रयोदश्यां ७
तु पारणं ॥ मार्कंडेय वाक्यं ॥ ॥ विवादेषु च सर्वेषु द्वादश्यां समुपोषणं ॥ पारणं तु त्रयोदश्यामाज्ञेयं मामकी मुने ॥ पा
द्मे ॥ ॥ न करिष्यति ये लोके द्वादश्यां पृष्ठे समाज्ञया ॥ तेषां यमपुरे वासो यावदाभूतसंप्लवं ॥ सूत वाक्यं शौनकं प्रति ॥ ब्रह्म

वैवर्ते ॥ ॥ उन्मीलिनी वंजुली च त्रिस्पृशा पक्षवर्धिनी ॥ जया च विजया चैव जयंती पापनाशिनी ॥ द्वादश्यष्टौ महापुण्याः सर्व
पापहरा द्विज ॥ पाद्मे ब्रह्मवैवर्ते ॥ ॥ एकादशी तु संपूर्णा वर्धते पुनरेव सा ॥ द्वादशी नैव वर्धेत कथितोन्मीलिनी हि सा ॥ एका
दशी यदा सम्पूर्णा परतः पुनरेव सा ॥ पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणं ॥ एकादशी यदा सम्पूर्णा परतः पुनरेव सा ॥ अत्रो
पोष्या द्वितीया तु पुत्रपौत्रविवर्धिनी ॥ अथ वंजुली पाद्मे ॥ ॥ संपूर्णैकादशी यत्र द्वादशी च तथा भवेत् ॥ त्रयोदश्यां मुहू
र्तार्धं वंजुली सा हरिप्रिया ॥ शुक्ले पक्षेऽथवा कृष्णे यदा भवति वंजुली ॥ एकादशी दिने भुक्त्वा द्वादश्यां कारयेद् व्रतं ॥ पार
णं द्वादशी मध्ये त्रयोदश्यां न कारयेत् ॥ ब्रह्मवैवर्ते ॥ ॥ द्वादशी च विवर्धेत न चैवैकादशी यदा ॥ वंजुली तिस्तु उक्ता ष्टकाधि
पापनाशिनी ॥ अथ त्रिस्पृशा नारदवचनं ॥ ॥ एकादशी कलार्धं च रात्रिशेषे त्रयोदशी ॥ तत्र क्रतुशतं पुण्यं त्रयोद
श्यां तु पारणं ॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति ॥ अथ पक्षवर्धिनी ॥
स्कांदे ॥ ॥ कुहूराका यदि वा स्यात् संपूर्णा दिदृश्यते यदा ॥ सूर्योदये षष्टि घटिका दृश्यते प्रतिपद्दिने ॥ अश्वमेध क्रतोस्तुल्ये ।
सा पक्षवर्धिनी ॥ महती सा समाख्याता द्वादशी पक्षवर्धिनी ॥ शुक्लार्कैकादशी विशेषा द्वादशी समुपोषयेत् ॥ दिश
न्यापि न कर्तव्या पक्षहा द्वादशी जवेत् ॥ पाद्मे ॥ ॥ ही रोहिणी मध्यमा नेत्र यदाष्टम्यां स पुष्यिता ॥ आमर्दे दिव दैत्यानां तेन सा
मर्दकी स्मृता ॥ ब्रह्मवैवर्ते ॥ ॥ उत्तराके यदा दृश्येत् प्रयाति पक्षवर्धिनी ॥ विहायैकादशी स्पृष्टां द्वादशी समुपोषयेत् ॥ पा
द्मे ॥ ॥ जया च विजया चैव जयंती पापनाशिनी ॥ सर्वपापहरा ह्येता कर्तव्या फलकांक्षिभिः ॥ द्वादश्यां च सितेपक्षे यदा
ऋक्षं पुनर्वसु ॥ नाम्ना सा तु जया ख्याता तिथीनामुत्तमा तिथिः ॥ यदा च शुक्ल द्वादश्यां नक्षत्रं श्रवणं भवेत् ॥ विजया सा ति

थिः प्रोक्ता॥ तिथीनामुत्तमा तिथिः॥ पद्माउष्णकृष्णा द्वादशी प्राजापत्यं प्रजायते जयंती नाम सा सर्वपापहरा तिथिः॥ प
द्माउष्णकृष्णा द्वादशी पुष्यं नवति कर्हिचित्॥ तदा सा तु महापुण्या कथिता पापनाशिनी॥ अगस्त्यसंहितायां रामनवमी
निर्णयः॥ ॥चैत्रे मासि नवम्यां तु शुक्लपक्षे रघूद्वहः॥ प्रादुरासीत्पुरा ब्रह्म परब्रह्मैव केवलं॥ तस्मिन्दिने तु कर्तव्यमुपवा
सव्रतं सदा॥ अशेषश्री रामनवमी दिने मर्त्यो विमूढधीः॥ उपोषणं न कुरुते कुंभीपाकेषु पच्यते॥ नवमी चाष्टमी विद्धा त्याज्या
विष्णुपरायणैः॥ उपोषणं नवम्यां वै दशम्यामेव पारणं॥ दशम्यामेवेते नकारा द्वादश्यां पारणं नियमान्नवमी ह्यये द्वि
द्धि वर्ज्जया॥ चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः॥ पुनर्वसुऋक्षसंयुक्ता तिथिः सा सर्वकामदा॥ अथ दोलोत्सवम
हिमा॥ ॥ब्रह्मोक्ते॥ ॥दक्षिणाभिमुखं देवं दोलारूढं सुरेश्वरं॥ सकृद्दृष्ट्वा तु गोविंदं मुच्यते ब्रह्महत्यया॥ दोलारूढं प्रप
श्यंति कृष्णं कलिमलापहं॥ अपराधसहस्रैस्तु मुक्ता स्तेनैव संशयः॥ तावत्तिष्ठंति पापानि जन्मकोटिकृतान्यपि॥ याव
न्नांदोलयेत्कृष्णं तूर्णं कंसविनाशनं॥ ब्रह्मांडपुराणे॥ ॥चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः॥ आंदोलनीयो
देवेशः सलक्ष्मीः कामदः सदा॥ पाद्मे॥ ॥ऊर्जे व्रतं मधौ दोलां श्रावणे तंतुपर्व च॥ चैत्रे दमनकारोपमकुर्वाणो व्रजे
त्यधः॥ तस्मिन्दृष्ट रायो नृसिंहस्य चतुर्दशी॥ पद्मे॥ ॥विज्ञाय मद्दिनं यस्तु लंघयेत्स तु पापकृत्॥ अन्यथा नरकं यांति याव
च्चंद्रदिवाकरौ॥ सर्वेषामेव लोकानामधिकारोस्ति मद्व्रते॥ इति नारसिंहे॥ ॥वैशाखशुक्लपक्षस्य चतुर्दश्यां समाचरेत्॥ १०
मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं॥ स्वातिनक्षत्रयोगे न शनिवारे मद्व्रतं॥ केवलेनापि कर्तव्यं मद्दिनं फलकांक्षि
हि नित्यो वैष्णवैस्तु न कर्तव्यो अन्यर चिद्धा चतुर्दशी॥ व्यासः॥ ॥वृषस्थे मिथुनस्थे वा शुक्ला एकादशी यदा॥ ज्येष्ठमासि त्र

यत्नेन सोपोष्य जलवर्जिता॥ स्नाने चाचमने चापि वर्जयित्वोदकं सुधीः॥ अप्रयत्नादवाप्नोति द्वादशद्वादशीफलं॥ भवि
ष्ये॥ ॥यो विना नियमं विप्रो व्रतं वा जाप्यमेव वा॥ चातुर्मास्यं नयेन्मूर्खो जीवन्नपि मृतो हि सः॥ श्रावणे पवित्रारोपणं
शुक्लाद्वादश्यां॥ विष्णुरहस्ये॥ ॥पवित्रारोपणं विष्णोर्न करिष्यन्नप्रदायकं॥ स्त्री पुंसा हि हरिं पुण्यं सुखसंपद्धनावहं॥ विधिना
॥ ब्रह्मदृष्टेन यो न कुर्यात्पवित्रकं॥ हरंति राक्षसास्तस्य वर्षपूजादिकं फलं॥ रामार्चनचंद्रिकायां॥ ॥तत्रोत्तमं पवित्रं तु
पट्ट्या पट्वांतैस्त्रिभिः॥ मध्यमं त्वायुतं तंतु सप्तविंशं मध्यमं स्मृतं॥ चाशीतिना त्र्यते नैव कनिष्ठं तत्समाचरेत्॥ भा
द्रपदाष्टमी जन्माष्टमी॥ विष्णुरहस्ये॥ ॥अष्टमी कृष्णपक्षस्य रोहिणी ऋक्षसंयुता॥ भवेत्प्रौष्ठपदे मासि जयंती ना
म सा स्मृता॥ प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी॥ मुहूर्त्तमपि लभ्येत सैवोपोष्या महाफला॥ विष्णुपुराणे॥
॥ लग्ने दशा निवेद्य त्वकजे करो हिणी नृपजयंती नाम मासे या उपोष्या सा प्रयत्नतः॥ ब्रह्मवैवर्ते॥ ॥वर्जनीया
प्रयत्नेन सप्तमी संयुताष्टमी॥ पाद्मेपि॥ ॥उदये चाष्टमी किंचिन्नवमी सकला यदि॥ प्राजापत्यर्क्षसंयुक्ता सैवोपोष्या
महाफला॥ भविष्ये॥ ॥नवम्यां योगनिद्राया जन्माष्टम्यां हरेरतः॥ नवमी सहितोपोष्या रोहिणी बुधसंयुता॥ स्कांदे॥ ॥
सकलाप्यसलक्षापि नवमी संयुतापि वा॥ जन्माष्टमी सर्वविधा न कर्तव्या कदाचन॥ पलवेधेपि विप्रेंद्र सप्तम्याचा
ष्टमीं त्यजेत्॥ सुरया बिंदुना स्पृष्टं गंगांभः कलशं यथा॥ विना ऋक्षेण कर्तव्या नवमी संयुताष्टमी॥ साकर्क्षापि न कर्त
व्या सप्तमी संयुताष्टमी॥ वायुपुराणे॥ ॥यदीच्छेत्सर्वपापानि हंतुं निरवशेषतः॥ उत्सवां तत्र सदा विप्र जन्नाद्याप्यन्नमा
नयेत्॥ श्रवणद्वादशी॥ ॥भविष्ये॥ ॥मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॥ महती द्वादशी ज्ञेया उपवासे महाफ

ना। ब्रह्मवैवर्ते॥ ॥ आदित्याद्यपदेशेन कोऽपि द्वेष्य दिने दिने॥ क्षुधश्रवणसंयोगः प्राप्यते तत्र हृज्जितः॥ अयलतिष्ठन्तान
कामान्वा मनोमन सिद्धितान्॥ विजयानाम सा प्रोक्ता तिथिः प्रीतिकरी हरेः॥ मार्कण्डेये॥ ॥ श्रवणर्क्षसमायुक्ता द्वादशी
या दृष्टा स्यात्॥ उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणा॥ नारदीये॥ ॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित्॥ एका
दशी न द्रष्टव्या पापघ्नी श्रवणान्विता॥ मात्स्ये॥ ॥ द्वादशी श्रवणोपेता यदैकादशी यदि॥ विष्णुशृंखलयोगोऽयं
तत्र कृत्स्नफलप्रदं वा द्वादश्यां लुप्तहेतुं न लंघयेत् श्रवणं यदि। उपोष्यैकादशीं लब्ध्वा द्वादशीमप्युपोषयेत्॥ ब्रह्माण्डे॥ ॥ द्वा
दश्यां तु दिने ब्रह्मन् नक्षत्रे केशवे संस्थिते। उपवासद्वयं कुर्यात्तिथिविष्णुतत्पर॥ न स्मरः॥ भविष्ये॥ ॥ एकादशी यदा भ्रष्टा द्वा
दशी श्रवणान्विता॥ उपवासद्वयं कुर्यात्तयोर्देवं तं हरिं॥ वामने॥ ॥ एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषयेत्
अतक्षय्य तत्पुण्यं पश्यवमानेनोत्पलशायी॥ पाद्मे॥ ॥ यमचतुर्दश्यां मान्या ब्राह्मणा मौकृत्तिकाय यदा॥ अनर्क सुदिते का
लेतल्लयपद्धे चतुर्दशी॥ प्रीतालोष्टसमायुक्तं कंदकदलान्वितं॥ हरपापमपामार्ग भ्राम्यमाणः पुनः पुनः॥ इति मंत्र
॥ ॥ अथ गोवर्धनपूजामंत्रः॥ ॥ गोवर्द्धन धराधार गोकुलत्राणकारक॥ विष्णुबाहुकृतच्छाय गवां कोटिप्रदो भव
ब्राह्मे॥ ॥ एकादश्यां तु शुक्लायां कार्त्तिके मासि केशवं॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः॥ नृत्यैर्गीतैस्तथा
काद्यैस्तूर्यपनुक्तानमंगलैः। उत्तिष्ठोत्तिष्ठ गोविंद इति मंत्रः॥ मात्स्ये॥ ॥ चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवेऽपि वा॥ माघे ११
वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत्॥ प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे॥ पंचमी च द्वितीया च तृतीया सप्तमी
तथा॥ दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी॥ आषाढे च तथा मूलमुत्तरात्रयमेव च॥ ज्येष्ठाश्रवणरोहिण्यः पू

र्वाभाद्रपदे तथा॥ हस्ताश्विनी रेवती च पुष्ये मृगशिरस्तथा॥ अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते॥ बुधो बृह
स्पतिः शुक्रस्त्रय एते शुभावहाः॥ ब्रह्मपुराणे॥ ॥ खंडितं स्फुटितं दग्धं भ्रष्टं मानविवर्जितं॥ यागहीनं पशुस्पृष्टं पति
तं दुष्टं च मिश्रितं॥ अन्यमंत्रार्चितं चैव पतितस्पर्शदूषितं। दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः॥ आसननिर्णये॥ ॥
पद्मासने वा व्याघ्रचर्मे ह्यानानाविधैः मृगाजिने वस्त्रासने रोगहरं वेत्रजं श्रीविवर्द्धनं। कौशेयं पुष्टिदं प्रोक्तं कम्बलं दुःखमोच
नं। उत्पापी केशकोन मोक्षं च शोषणावृतं। अपवित्रः करोऽशुद्धः जपन्नजपेत्कृवित्त्या॥ ब्रह्माण्डे॥ ॥ शैवो वा वैष्णवो वा दी
क्षितो यस्त्वथा त्रिपरिग्रहः॥ यतिश्च ब्रह्मचारी च नाशौचं तस्य विग्रहे॥ पंचरात्रे॥ ॥ सूतके मृतके चैव नित्यं विष्णुमयस्य
वा पापानुष्ठानस्य विप्रेन्द्रस्य शुद्धिः प्रजायते॥ जपो देवार्चनविधिः कार्यो दीक्षान्वितैर्नरैः॥ नास्ति पापं यतस्तेषां सूत
कं वा यतात्मनां॥ ब्रह्माण्डे॥ ॥ आशौचं नैव विद्येत सूतकं मृतकं च यत्। येषां पापोद्भवं सूक्ष्मं नाशानन्ये प्रकुर्वते॥ प्र
कादशद्विरिताः॥ ॥ उत्तमो काष्ठसंभूतं यो मालां वहते नरः॥ प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे॥ शिवविष्णुसमर्पणे
दीक्षायस्यत्वा त्रिपरिग्रहः॥ प्रातिकर्मणि तत्कालं स्नानं शुद्धिमवाप्नुयात्॥ समित्पुष्पफलादीनि वहंतेनान्निवाहये
त्॥ सूत्रानीतिः क्रयः क्रीतिः कर्मकृत्वनन्यतत्पथः॥ विष्णुधर्मोत्तरे॥ ॥ न्यायार्जितधनक्रीतैर्यः कुर्यात्केशवार्चनं॥ उद्धरिष्यत्य
संदेहं दश पूर्वान्दशापरान्॥ नारदपंचरात्रे॥ ॥ लौकिको वैदिको वापि प्रक्रिया या क्रियते मुने। हरिसेवानुकूलैव सा का
र्या नित्यमिच्छता॥ पाद्मे॥ ॥ गुरोश्चक्रे तिथिं च मे जन्मर्क्षे तु तथा हरेः। हरिस्तु वै भवान्कापि कापि वैष्णवजन्मम॥ ब्रह्माण्डे॥ ॥
प्रायश्चित्तं यदि प्राप्तं न कुर्याद्यस्त्वघमर्षणं। सोऽपि पापाद्विमुक्तः पीवा शुद्धिमाप्नोति तत्क्षणात्॥ पाद्मे॥ ॥ द्वेष्टारो विष्णुन

कानां येवा वैष्णवसंश्रया ।। पार्षदत्वं समापुस्ते वैपार्षदिनः स्मृता ।। समस्याय तस्यो कार मविदि दिवास्तु तं हरिं । गृह्य
रूपदेवता एव मुक्तात्मिवक्षाति ।। महाषंडीतिविते यास्त्वां तत्त्वं वा पिकमस्तु ।। नारदपंचरात्रे ।। श्रेशात्रादि हरेः सर्वब्रह्म
इत्यादि परतिश्रुतिः ।। तथापि मनुष्यत्वं यांति निर्गगा पच्च्युतादिवत् ।। श्रुवपंचरात्रे ।। ।। यावदन्याश्रयस्तावद्भगवानपि तं
जनं । दिव्यलोकपेन्नद्ययात्येन न्यजनवत्सलः ।। स्कांदवाक्यं ।। ।। अन्यायकायथारामा कांडं । तन्नृपतिं प्रति । य एव नावो
द्देशेषानन्किंचिन गृह्यात ।। पतोपहारिणी पद्यदालापं कं कृतेन्यतः । तद्ददविहरै यस्य पानं किंचिन गृह्यात ।। पुरंदं
स्वधतं चैव हृत्वकर्म विशातुगं । विष्णुनकिर्तविगम्या विष्णुकथ्य संगतः ।। बृहन्नारदीये ।। पुराणेष्वर्थवादत्वं येवदंति
नराधमाः । तैरर्जितानि पुण्यानि तद्वदेव भवंति वै ।।छ।। ।।इति विरक्तबोधयोगी निर्णयः समाप्तः ।। ।।छ।। ।।श्री।।। ।।छ।।

१०।

२२